International Journal of Sanskrit Research 2022; 8(3): 87-88

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(3): 87-88
© 2022 IJSR
www.anantaajournal.com
Received: 14-01-2022
Accepted: 16-03-2022

**Dr. Dayanidhi Mishra**
M.A & PH.D. in Dharmashastra (Sanskrit), Lecture in Dharmashatra at Sri Sri Ananta Narayan Sanskrit, College, Ayatpur, Kendrapara, Odisha, India

**Corresponding Author:**
**Dr. Dayanidhi Mishra**
M.A & PH.D. in Dharmashastra (Sanskrit), Lecture in Dharmashatra at Sri Sri Ananta Narayan Sanskrit, College, Ayatpur, Kendrapara, Odisha, India

# व्यवहारपादचतुष्टयविमर्श:

**Dr. Dayanidhi Mishra**

**सारांश**
धर्मशास्त्रे आचार -व्यवहार -प्रायश्चित्तअध्यायेषु व्यवहारो$ध्यायस्य समाजे लोकानां हितसाधनाय आवश्यकता भवति। गुणकर्मानुसारेण क्षत्रिय: प्रजापालनादीनि कर्माणि निर्दिष्टानि वर्त्तन्ते। स एव क्षत्रिय: राजा भवितुमर्हति। राजा व्यवहारदर्शनार्थं व्यवहारस्यास्य पादचतुषटयं व्वव्ह्वीयते।

**प्रस्तावना**
वि उपसर्गीत् अव् उपसर्गात् हृ धातो: घञ् प्रत्यये व्यवहारो निष्पद्यते। व्यवहार नाम अन्यविरोधेन स्वात्मसंबन्धितया कथनमिति याज्ञवल्क्यस्मृतौ मिताक्षराटीकायां दृश्यते।अत्र धर्मशास्त्रकारेण प्र प्रथमतया भगवता मनुना प्रतिपादितम्- "व्यवहारान् दिदृक्षस्तु ब्राह्मणै: सह पार्थिव:।" इति मनुवचनमाधारीकृत्यअ परवर्त्तिकालीन: शास्त्रकारयाज्ञवल्क्य: तथैववचनमुपस्थापयति। यथा-"व्यवहारान्नृप: पश्येद्विद्वद्भिर्बाह्मणै: सह।" अत्र विद्वद्भि शब्दस्य वेदधर्मशास्त्रव्याकरणाद्यभिज्ञब्राह्मणै: सह राजा व्यवहारं पश्येत्। अस्यैव व्यवहारदर्शनार्थं राजा एव प्रथम: योग्यो भवति।व्यवहारदर्शननिमित्तं राजा तामेव ब्राह्मणादियुक्तां सभां विनीतो भूत्वा प्रविशेत्।तत्र सभायां स्थितो वा दक्षिणपाणिमुदम्य विनितेन चापि अनुद्वेगकरेण वेशेन कार्यिणां नाम व्यवहार:। निरतानां कर्मचारीणां वादी-प्रतिवादीनां कार्याणि संपश्येत्।तान्येव कार्याणि व्यवहारपदनीति निगदितानि। अयं च व्यवहारस्य लक्षणं भगवता याज्ञवल्क्येन तस्य स्मृतौ प्रतिपादितम्- स्मृत्याचारव्यपेतेन मार्गेणा$धर्षित: परै:। आवेदयति चद्राज्ञे व्यवहारपदं हि तत्।। नारदेन व्यवहारस्यास्य लक्षणविषये इदं स्पष्टीकृतंयत्-विनानार्थे$वसंदेहे हरणं हार उच्यते। ना संदेह हरणात् व्यवहार इति स्मृत:।। अस्मिन् व्यवहारप्रसंगे नीलकण्ठभट्टेन स्वकीयस्य व्यवहारमयूखाख्यग्रन्थस्य प्रारम्भेव्यवहारस्य लक्षणं

प्रतिपादितम्-वुप्रतिपद्यमान नरान्तरगता ज्ञातधर्म ज्ञापनानुकुलो व्यापारो नाम व्यवहार:। अयं च व्यवहार:
अष्टादशभागेन भिद्यते। तत्र आदिस्मृतिकारेण भगवता मनुना प्रतिपीदितम्-

तेषामाद्यमृणादानं निक्षेपोस्वामिविक्रय:।
संभूय च समुत्थानं दत्तस्यानपकर्म च।।
वेतनस्यैव चा दानं संविदश्च व्यतिक्रम:।
क्रयविक्रयानुशयो विवादस्वामिपालयो:।।
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च।।
स्त्रीपुंधर्मो विभागश्च द्युतमाह्वयएव च।
पदन्यष्टदशैतानि व्यवहारस्थि,ताविह।।

एवं प्रकारेण अष्टादशव्यवहारपदानि सन्ति। तस्यैव व्यवहारपदस्य पादचतुष्टयो भवति। यथाह महर्षियाज्ञवल्क्य:-

"चतुष्पाद्व्यवहारो$यं विवादेषूपदर्शित:।"

ते यथा-क) भाषा, ख) उत्तरम्, ग) क्रिया, घ) साध्यसिद्धिश्चेति।
क) भाषा-सैव भाषा भवति यदा वादि असमासेन सरलया संदिग्धया स्थिरचित्तेन शुद्धेन यत् राज्ञे आवेदयति सा एव भाषा इति।भाषा, प्रतिज्ञा, पक्ष इति नामान्तरम्।अस्या: भाषाया: लक्षणम्-

अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलम्।
साध्यवद्वाचकपदंप्रकृतार्थानुबन्धि च।।
प्रसिद्धमविरुद्धं च निश्चितं साधनक्षमम्।
संक्षिप्तं निखिलार्थं
च देशकालाविरोधि च।।
वर्षर्त्तुमासपक्षाहोवेलादेशप्रदेशवत्।

स्थानवसथसाध्याख्याजात्याकारवयोयुतम्।।
साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामवत्।
परात्मपूर्वजानेकाराजनामभिरङ्कितम्।।
क्षमालिङ्गात्मपीडावत्कथिताहर्त्तृदायकम्।
यदावेदयते राज्ञे तद्भाषेत्यभिधीयते।।
अत्र पक्षवत्आभासते इति पक्षाभास:।
पक्षाभासस्तु पञ्चविध:।यथा-
"अप्रसिद्धं निरावाधं निरर्थं निष्प्रयोजनम्।
असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्।।"

अप्रसिद्धं नाम मदीयं शशविषाणं गृहीत्वा न प्रयच्छति इत्यादि। नीरावाधम् अस्मद्गृहदीपप्रकाशेन अयं स्वगृहे व्यवहरति। नीरर्थं नाम अभिधेयरहितं कचटतप इत्यादि। निष्प्रयोजनं यथाअयं देवदत्तो$स्मद्गृहसंन्निधौ सुखरमधीत इत्यादि। असाध्यं यथा-अहं देवदत्तेन सभ्रुभङ्गमुपहसित। विरुद्धमिति अहंमुक्तेन इत्यादि।
उत्तरम्-श्रुतो भाषार्थो येन प्रत्यर्थिना$सौश्रुतार्थ:, तस्योत्तरं पूर्वपक्षात् उत्तरत्र भवतीति उत्तरम्। उत्तरस्य लक्षणविषये मिताक्षराटीकायां दृश्यते-

पक्षस्य व्यापकं सारमसंदिग्धमनाकुलम्।
अव्याख्यागम्यमित्येतदुत्तरं स्याच्चतुर्विधम्।।
उत्तरं चतुरविधम्-कात्यायनेन उक्तम-
सत्यं निथ्योत्तरं चैव प्रत्यवस्कन्दनं तथा।
पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधम्।।

ग)-क्रिया-अर्थि प्रत्यर्थिन: कर्त्तृकअभियोगं तथा प्रत्यभियोगं प्रमाणंकर्त्तृ साक्षी, लेखं, भोगं, दिव्यं वा प्रमाणप्रदर्शनपूर्वकं विचारं क्रिया इत्युच्यते।
कस्मिन् उत्तरे कस्य क्रियाअस्मिन्प्रसंगे उक्त-सत्योत्तरे क्रिया नास्ति, मिथ्योत्तव्यरे वादिन: क्रिया, प्रत्यवस्कन्दने प्राङ्न्याये चप्रतिवादिन: क्रिया।

घ)-साध्यसिद्धि:-व्यवहारो$यमन्तिमपाद:। प्राड्विवाक: अभियोगं, अर्थिप्रत्यर्थिन:कार्यकलापं दर्शनादनन्तरं यस्मिन् सिद्धान्ते उपनीतो भवति स साध्यसिद्धरिति।

## संदर्भग्रंथ सूची

1. याज्ञवल्क्यस्मृतौ मिताक्षराटीका, मनुस्मृतौ मेधातिथि टीका, मन्वार्थमुक्तावली, प्रो॰ व्रजकिशोरस्वाइॅा महोदयस्य राजधर्मपुस्तकम् ।